© 2018 IJSRST | Volume 4 | Issue 2 | Print ISSN: 2395-6011 | Online ISSN: 2395-602X
International Journal of Scientific Research in Science and Technology

# वैदिकवाङ्मये शिक्षाव्यवस्थायाः स्वरूपम्

प्रो.रजनीकान्तशुक्लः
शिक्षासङ्कायः, राष्ट्रियसंस्कृतविद्यापीठम् (मानितविश्वविद्यालयः) तिरुपतिः

प्राचीनभारतीयशिक्षैका ज्ञानजः अभिलेखः वर्तते, यस्य अनुरणनं निखिलभारतीयसमाजस्य संवेदनया अनुप्राणितं वर्तते। शिक्षा जीवनस्य मूललक्ष्यमासीत् या ऋषिमहर्षीणां दिव्यां वाचं कालातीतज्ञानस्योत्तुङ्गभावभूमेः पृष्ठभूमिं प्रादात्। भारतस्य प्राचीनशिक्षायाः क्षेत्रं निश्चयेन बहुव्यापी अस्ति। वेदोपनिषदां तथा कल्पसूत्राणामुपदेशवचनानि जीवनस्य बहुवर्णदृश्यैः ओतप्रोतानि वर्तन्ते। चिन्तनस्यास्मिन्नेव क्रमे प्राचीन- भारतीय- शैक्षिक परिदृश्योपरि एकः सहजाक्षिनिक्षेपः (दृष्टिक्षेपः) आवश्यकोऽस्ति ।

**वेदकालीनपरिदृश्यः** ऋग्वेदे शिक्षायाः प्रारम्भिकानि सूत्राणि लभन्ते । यजुर्वेद- सामवेद अथर्ववेदेषु अपि तत्कालीन शिक्षाव्यवस्थायाः पर्याप्ताः संकेताः मिलन्ति। विद्वांसः ऋग्वेदमेव ज्ञानस्यादिकोशत्वेनाङ्गीकुर्वन्ते । अस्य कारणम् ऋग्वेदः सर्वेषु ग्रन्थेषु वेदेषु च आदिमः ।

वैदिककालीनशिक्षा पूर्णरूपेण आध्यात्मिका आसीत्। परन्तु बालकानां सर्वाङ्गीणविकासं प्रति पूर्वावधानमपि तस्मिन् समये आसीत्। शिक्षायाः प्रतिक्षेत्रं धार्मिकभावनया व्याप्तमासीत् । पुनरपि विद्यार्थिनः विकासः एकाङ्गी नासीत् । आध्यात्मिकं भौतिकञ्चोभयं ज्ञानं बालकेभ्यः दीयते स्म ।

प्रारम्भिकशिक्षा गृहे एव दीयते स्म । पश्चात् बालकः गुरुगृहे, गुरुकुले उषित्वा विद्योपार्जनं करोति स्म। गुरुगृहं प्रवेशात्पूर्वं उपनयनसंस्कारः अनिवार्यः आसीत् । अथर्ववेदे प्रमाणमिदं लभते-

आचार्य उपनयमानो ब्रह्मचारिणं वृणुते गर्भमन्तः तं रात्रीस्तिस्र उदरे बिभर्ति तं जातंद्रष्टुमभिसंयन्ति देवाः ।

अस्यायमर्थः भवति यत् आचार्यः ब्रह्मचारिणं स्वीयगर्भे तिस्रः रात्रीः बिभर्ति पश्चात् तं जन्म प्रददाति। जातं तं ब्रह्मचारिणं द्रष्टुं देवाः समायान्ति । अयमुपनयनसंस्कारः ब्राह्मणक्षत्रियवैश्यानां कृते क्रमशः अष्टवर्षे, एकादशवर्षे, द्वादशवर्षे च क्रियते ।

पूर्वं यथोक्तं यत् वैदिककालीनशिक्षायाः उद्देश्यं सत्यपि आध्यात्मिके कर्मप्राधान्यं नोपेक्षितम्। तदानीं लौकिकाध्यात्मिकविषयाणां समानं महत्वमासीत्। विषयद्वयमपि पाठ्यविषयत्वेन पाठ्यते स्म। आध्यात्मिकशिक्षायाम् आत्मा परमात्मा वेद- पुराण- राजनीति- इतिहासेत्यादीनामध्यापन भवति स्म। लौकिकविषयेषु अङ्कगणितेतिहास-राजनीति- ज्योतिष भौतिकशास्त्राण्यासन्। सर्वेषां विषयाणामध्यापनव्यवस्था वर्णविशेषानुसारं विभक्ता आसीत् ।

शिक्षणपद्धतिः तदानीं मौखिकी आसीत्। शिक्षणपद्धतौ वादविवादः, शास्त्रार्थः, प्रवचनं, व्याख्या, शङ्कासमाधानं, प्रश्नोत्तराणि इत्यादीनां महत्स्थानमासीत्। आश्रमस्य नियमितदिनचर्यानुसारं विद्यार्थी स्वीयं नित्यकर्मानुष्ठानं करोति स्म। एषु कर्मानुष्ठानेषु प्रातः ब्राह्ममुहूर्त्ते जागरणं ततः परं सायंकालं यावत् निश्चितनियमानुसारं दिनचर्या आसीत्।

Received : 03 Jan 2018 | Accepted : 15 Jan 2018 | January-February-2018 [ (4) 2: 2329-2332]

एकस्य वेदस्य अध्ययनाय द्वादशवर्षाणि अपि च वेदद्वयस्य अध्ययनाय चतुर्विंशतिवर्षाणि अपेक्षितानि आसन् । वेदस्येकस्य अध्येता स्नातकः वेदद्वयस्याध्येता वसु, वेदत्रयस्याध्येता रुद्रः, वेदचतुष्टयस्याध्येता आदित्यः इति कथ्यते स्म। मासे चत्वारः अवकाशाः आसन्। विशिष्टपर्वसु अपि अवकाशव्यवस्था पृथग्रूपेणासीत्। शिक्षा पूर्णतः निःशुल्करूपेण प्रदीयते स्म। तदानीन्तनकाले प्रतिव्यक्तिः वित्तैषणालोकैषणाभ्यां निर्लिप्तः आसीत्। अतःविद्यादानं पवित्रं कार्यं मत्वा शुल्कग्रहणमनावश्यकमसङ्गतञ्च आसीत्। तथा च

**अप्रतिग्राहकाः श्रोत्रियाः -इति यर्दुर्वेदीयशतपथब्राह्मणे, 4/2/4/9॥**

गुरुकुलस्य व्ययः विद्यार्थिभिः प्रदत्तगुरुदक्षिणाभिः जनसामान्यैः प्रदत्तदानेन अपि च राज्ञा प्रदत्तदानेन च उह्यते स्म।

अद्यत्वे या परीक्षाप्रणाली वर्तते सा प्राचीनकाले नासीत्। पूर्वदिवसस्य पाठं अपरस्मिन् दिने नूतनपाठारम्भात् प्राक् शिष्यः गुरुं श्रावयित्वा अग्रे पठति स्म । गुरुरपि पूर्वदिनपाठश्रवणेन सन्तुष्टः सन् एव अग्रिमं पाठं पाठयति स्म। शास्त्रार्थद्वारा काले काले तेषां छात्राणां परीक्षा भवति स्म ।

छातृणां कृते पृथक् शिक्षायाः व्यवस्था आसीत्। यद्यपि स्वतन्त्ररूपेणकन्यागुरुकुलाः न आसन् तथापि विद्यारम्भात् प्राक् तासाम् उपनयनसंस्कारः भवति स्म । ताः गृहे एव स्थित्वा अध्ययनकर्म कुर्वन्ति स्म। एतस्मिन् अध्ययनकाले ताः ब्रह्मचर्यमपि आचरन्ति स्म । तथा च–

**ब्रह्मचर्येण कन्या युवानं विन्दते पतिम् अथर्ववेद 11/5/18॥**

तस्मिन् काले गुरुशिष्यसम्बन्ध अत्यन्तमधुरः आसीत्। गुरुः शिष्यस्य आध्यात्मिकः पिता इति मन्यते स्म।

गुरु आश्रमस्य सर्वखः भवति स्म । तस्य कार्येषु न कस्यचिदपि हस्तक्षेपः आसीत्। आश्रमाः कुलवर्णजात्यातीताः सर्वेषां कुशलं, भद्रं सर्वान् प्रति समदृष्टिः समभावना आसीत् । सर्वदा प्रियभाषणं भद्रश्रवणमपि च कल्याणप्रदवस्तुदर्शनमेव (हितपवित्रदर्शनमेव)वैदिककालीनशिक्षायाः माहात्म्यं दर्शयति। तथा च–

**भद्रं कर्णेभिः शृणुयाम देवाः भद्रं पश्येमाक्षभिर्यजत्राः। ऋग्वेदे।**

औपनिषदीयशिक्षा– भारतीयशिक्षायामाध्यात्मिकभावनायाः स्रोतः उपनिषत्सु लभते। संहितापेक्षया तासां ब्राह्मणानामुपनिदां संस्कृतेः प्राधान्यमलभत्। ब्राह्मणेष्वेव वेदानाम् । अपौरुषेयत्वं दृग्गोचरीभवति। तथा च–

**यो ब्रह्माणं विदधाति पूर्वम्। श्वेताश्वतरोपनिषद्, 6/18**

उपनिषत्कालीनशिक्षायाः अभ्युदयस्य मूले याज्ञिकप्रक्रियायाः विकासो द्रष्टुं शक्यते। अस्मिन् काले याज्ञिकप्रणाल्याः कण्ठस्थीकरणमिति शिक्षायाः उद्देश्यमासीत्। उपनिषत्काले सत्यज्ञानाय सर्वैः चेष्टन्ते स्म । अनेनैव सत्यज्ञानेन मनुष्यः ब्रह्मज्ञानमधिगच्छति स्म। अस्मिन् काले भौतिकज्ञानापेक्षया आध्यात्मिकज्ञानं प्रति अधिका प्रवृत्तिरासीत्।

उपनिषत्कालानन्तरं वैदिककालीनपरिवेशे याः श्रवणमनननिदिध्यासनपद्धतयः प्रचलिताः आसन्। उत्तरवर्तिकाले आभिः सह स्वाध्यायप्रणाली सम्बद्धा विकसिता च अभवत्। एतदतिरिच्य आध्यात्मिकशिक्षोपरि अधिकप्रश्रयप्रदानस्य प्रवृत्तिरासीत् कर्मप्राधान्यासीत् । कर्मानुसारं फलविपाकचर्चा कृता वर्तते।

**यो यथा संकल्पं कुरुते तथैव कर्म करोति च**

**यः यथा कर्म करोति तथा तस्य भाग्यं भवति । बृहदारण्यकोपनिषत् ।**

अस्मिन् काले विद्यार्थिनः बहूनां विषयाणामध्ययनं कुर्वन्ति स्म । चत्वारः वेदाः, व्याकरणम्, ज्योतिषम्, शस्त्रविद्या, नृत्यम्, संगीतः, इतिहासः, पुराणानि इत्यादीनामध्यापनं भवति स्म। सामान्यतः अध्ययनं द्वादशवर्षाणि यावत् आसीत्। ब्रह्मचर्यव्रताचरणे बलं दीयते स्म। आश्रमदिनचर्या नियमिता व्यवस्थिता आसीत् अत्र विद्यार्थिना शीरीरिक- मानसिक- चारित्रिक- आध्यात्मिकविकासाय पूर्णावधानंदीयते स्म । विद्यार्थिभ्यः पूज्यगुरून् प्रति कर्तव्यताविषये शिक्षा दीयते स्म। कर्तव्यपालनं प्रति कर्तव्योत्तमतां प्रति अनवधानं महत्त्वञ्च दीयते स्म।

गुरुशिष्ययोः सम्बद्धः अस्मिन् काले ऋग्वेदकालसदृशः घनिष्ठः आसीत्। गुरवः छात्रवत्सलाः छात्रेषु स्निह्यन्ति स्म। छात्राः अपि गुरून् सश्रद्धं पूजयन्ति स्म। स्त्रीणां स्थितिः अस्मिन् काले समीचीना नासीत्। तासां न तावान् सामाजिकसम्मानः आसीत्। नापि अपेक्षिताधिकाराश्च । परिणामतः तस्मिन् काले तासां शिक्षाया। विकाशोऽवरुद्धः । गृहेष्वेव शिक्षायाः व्यवस्था आसीत्।

**सूत्रकालीनशिक्षाव्यवस्था**- उत्तरवर्तिकाले समुपार्चितवैदिकसाहित्यस्य एतावान् विकासः सञ्जातः येन तत् सर्वं वैदिकसाहित्यंमौखिकरूपेण स्मर्तुमवस्थापयितुं दुष्करः सज्जातः । अस्मिन्नेव काले सुत्रसाहित्यस्य विकासः सज्जातः । सूत्रसाहित्ये आदर्शान् सिद्धान्तान् सत्यानि च संक्षिप्तरूपेण ऋषयः लिलिखुः । अस्मिन् काले साहित्ये मौलिकतायाः अभावः दृश्यते। एते सूत्रकाराः स्वीयकलाप्रदर्शनं शब्दानामल्पप्रयोगेण एव घटे सागर निक्षिप्तुं प्रयतन्ते स्म ।

अक्षराणां विकासः अस्मिन् काले प्रचुरः आसीत्। गृहेऽक्षरस्वीकरणसंस्कारानन्तरं गुरुकुले शिक्षाप्रारम्भात् प्राकृ उपनयनसंस्कारः अनिवार्यः आसीत्। गुरुशिष्यपरम्परायां माता प्रथमव्यवहारज्ञानप्रदातृ- अक्षरज्ञानप्रदातृ चेत्युच्यते ।

**त्रयः पुरुषस्याति गुरुवो भवन्ति माता पिता आचार्यश्च -वि. धर्म. 32 / 1-21**

शिष्येभ्यः समुचितदिशानिर्देशनप्रदानं शुभकर्मणाम् आचाराणां शिक्षाप्रदानं शिष्यं प्रति गुरोः कर्त्तव्यत्वेन स्वीकृतः । अपि च गुरुः नित्यवेदाध्यायी शौचाचारयुक्तः दान्तः पवित्रः स्यात्। तथा च-

**उपनीयः गुरुः शिष्यं महाव्याहतिपूर्वकम् ।**

**वेदमध्यापयेदेनं शौचाचाराश्च शिक्षयेत् ।। याज्ञवल्क्यस्मृतिः 1/15**

**उपनीयः गुरुः शिष्यं शिक्षयेच्छौचमादितः ।**

**आचारमग्निकार्यञ्च सन्ध्योपासनमेव च।। मनुस्मृतिः - 2 / 69**

एतदतिरिच्य शिक्षार्थिनः चरित्रनिर्माणमपि शिक्षायाः प्रथमोद्देश्यमाचार्यस्य च प्रथमं कर्त्तव्यं मन्यन्ते स्म ।

**आचार्याधीनो भवति अन्यत्राधर्माचरणात्। गौतमधर्मसूत्रम्।**

अस्यां शिक्षाव्यवस्थायामेकवेदस्य कृते द्वादशवर्षाणि नियतानि आसन् । विद्यार्थी स्वीयप्रतिभया बुद्ध्या सामर्थ्यानुसारं विद्यामर्जयति स्म। अस्मिन् काले व्याकरणाध्ययनाय अधिकं बलं दीयते स्म । अपि च वेदाः, वेदाङ्गानि, छन्दः, कल्पः, निरुक्तं, संख्याशास्त्रं, चिकित्साशास्त्रं, दर्शनानि इत्यादीनां विषयाणाम् अध्यापनं भवति स्म।

सूत्रकाले अपि सम्पूर्णा शिक्षाव्यवस्था वेदकालसदृशधार्मिकभावनाधारिता आसीत्।अस्मिन् काले अपि अध्ययनाध्यापनपद्धतिः मौखिकी आसीत् । श्रवणमनननिदिध्यासनस्वाध्यायेषु बलं दीयते स्म । सूत्रसाहित्ये स्त्रीणां कृते वैदिककाल इव आदरो लब्धः । अस्मिन् कालावधौ बह्वीनां शिक्षिकाणां तत्र तत्रोल्लेखः वर्तते ।

अस्मिन् युगे परिषदः एव शिक्षायाः संस्थाः आसन् । इमाः परिषदः यथार्थरूपेण विद्वत् सभाः आसन्। परिषत्सु आधुनिकविश्वविद्यालयसदृशः समस्तोपकरणानि आसन्।